दुष्टव्रणे यद्विहितञ्च तैलं
तत् सेव्यमानं गतिमाशु हन्ति ॥
जात्यर्कसम्पाककरञ्जदन्ती-
सिन्धूत्थसौवर्च्चलयावशूकैः ।
वर्त्तिः कृता हन्त्यचिरेण नाड़ीं
स्नुक्क्षीरपिष्टा सह चित्रकेण ॥
महिषदधिकोद्रवान्नमिश्रं हरति चिरविरूढ़ाञ्च।
भुक्तं कङ्गुनिकामूलचूर्णमतिदारुणां हन्ति ॥
कृशदुर्ब्बलभीरूणां गतिर्म्मर्म्माश्रिता च या ।
क्षारसूत्रेण तां भिन्द्यान्न शस्त्रेण कदाचन ॥
एषण्या गतिमन्विष्य क्षारसूत्रानुसारिणीम् ।
सूच्यीं विदध्याद्गत्यन्ते चोन्नम्याशु च निर्हरेत्॥
सूत्रस्यान्तं समानीय गाढ़बन्धनमाचरेत् ।
ततः क्षारबलं वीक्ष्य सूत्रमन्यत् प्रवेशयेत् ॥
क्षाराक्तं मतिमान् वैद्यो यावन्न छिद्यते गतिः ।
भगन्दरेऽप्येष विधिः कार्य्यो वैद्येन जानता ॥
गुग्गुलुस्त्रिफलायोषैः समांशैराज्ययोजितः ।
नाडीदुष्टव्रणं शूल-भगन्दरविनाशनः ॥
इति सप्ताङ्गगुग्गुलुः ॥
स्वर्ज्जिका सिन्धुदन्त्यग्निरूपिकानलनीलिका ।
खरमञ्जरीबीजेषु तैलं गोमूत्रपाचितम् ॥
दुष्टव्रणप्रशमनं कफनाडीव्रणापहम् ॥
इति स्वर्ज्जिकाद्यं तैलम् ॥
समूलपत्रां निर्गुण्डीं पीडयित्वा रसेन तु ।
तेन सिद्धं समं तैलं नाडीदुष्टव्रणापहम् ॥
हितं पामापचीनान्तु पानाभ्यञ्जननावनैः ।
विविधेषु च स्फोटेषु तथा सर्व्वव्रणेषु च ॥
इति निर्गुण्डीतैलम् ।
हंसपाद्यरिष्टपत्रं जातीपत्रं ततो रसैः ।
तत्कल्केन पचेत्तैलं नाड़ीव्रणविशोधनम् ॥
इति हंसपादादितैलम् ॥”
इति वैद्यकचक्रपाणिसंग्रहे नाड़ीव्रणाधिकारः ॥ )

नाड़ीशाकः, पुं, (नाड़ीप्रधानः शाकः।) नाड़ीकः। इति भावप्रकाशः ॥ पाट्शाक इति भाषा ॥

नाड़ीस्नेहः, पुं, ( नाड्यामेव स्नेहो यस्य। नाड़ीसारत्वादेवास्य तथात्वम्।) भृङ्गी। इति शब्दरत्नावली ॥

नाड़ीहिङ्गु, स्त्री, ( नाड़ीप्रधानं हिङ्गु।) हिङ्गुभेदः। कलःपतिहिङ्गु इति हिन्दीभाषा। तत्पर्य्यायः। पलाशाख्यः २ जन्तुका ३ रामठी ४ वंशपत्री ५ पिण्डिका ६ सुवीर्य्या ७ हिङ्गुनाड़िका ८। ( यथाच वैद्यकरत्नमालायाम्।
“हिङ्गुपर्णी वेणुपत्री नाडीहिङ्गु शिवाटिका ॥”) अस्य गुणाः। कटुत्वम्। उष्णत्वम्। कफवातनिशान्तिकारित्वम् । विष्ठाविबन्धदोषानाहामयनाशित्वञ्च। इति राजनिर्घण्टः ॥

नाणकं, क्ली, ( अणति शब्दायते इति। अण शब्दे+ण्वुल्। न आणकम्।) मुद्राचिह्नितनिष्कादि। यथा,—
“तुलाशासनमानानां कूटकृन्नाणकस्य च ।
एभिश्च व्यवहर्त्ता यः स दाप्यो दण्डमुत्तमम् ॥”
इति मिताक्षरायां साहसप्रकरणीययाज्ञवल्क्यवचनम् ॥

नात्रं, क्ली, ( नम्यते आख्यायते प्रशस्यते सर्व्वैरिति। नम+ष्ट्रन्। बाहुलकात् अन्तलोप आत्वञ्च।) विचित्रम्। प्रश्नः। शिवः। इति संक्षिप्तसारोणादिवृत्तिः ॥

नाथ, ऋ ङ आशिषि। इवैश्ये‍ऽर्थे। इति कविकल्पद्रुमः ॥ ( भ्वां-परं-आत्मं च-सकं-ऐश्ये अकं-सेट्।) दन्त्यादिरयम्। ऋ, अननाथत्। ङ, प्रणाथते प्रनाथते। इव उपतापः। आशीरिष्टार्थाशंसनम्। ङित्त्वेऽपि शपथाशीर्गत्युपकारे इति नियमादाश्यामाशिषोऽन्यत्र परस्मैपदम्। नाथति शत्रुं बली उपतापयतीत्यर्थः। नाथते श्रियं लोकः आशंसते इत्यर्थः। नाथति धनी ईश्वरः स्यादित्यर्थः। नाथति भूपं भूमिं विप्रः प्रार्थयतीत्यर्थः। मार्गणैरथ तव प्रयोजनं नाथसे किमु न भूभृतः पतिमिति भारवौ याचनमप्याशंसाविशेषः। आशिषि नित्यमात्मनेपदमन्यत्र विभाषयेति केचित्। इति दुर्गादासः ॥

नाथः, पुं, ( नाथति ईश्वरो भवतीति। नाथ ऐश्ये+अच्।) ऐश्वर्य्ययुक्तः। तत्पर्य्यायः। अधिपः २ ईशः ३ नेता ४ परिवृढ़ः ५ अधिभूः ६ पतिः ७ इन्द्रः ८ स्वामी ९ आर्य्यः १० प्रभुः ११ भर्त्ता १२ ईश्वरः १३ विभुः १४ ईशिता १५ इनः १६ नायकः १७। इति हेमचन्द्रः ।३।२३॥ ( यथा, रामायणे। २। ४८। १७।
“स हि नाथो जनस्यास्य स गतिः स परायणम् ॥”)

नाथवान्, [त्] त्रि, ( नाथो विद्यतेऽस्येति। नाथ+मतुप्। मस्य वः।) पराधीनः। इत्यमरः ।३। १। १६ ॥ प्रभुविशिष्टः ॥ ( रक्षकवान्। यथा, रामायणे। १। ६२। १२।
“नाथवांश्च शुनःशेफो यज्ञश्चाविघ्नतो भवेत् ॥”
स्त्रियां ङीप्। यथा, रामायणे। २। ३८। १।
“तस्यां चीरं वसानायां नाथवत्यामनाथवत्।
प्रचुक्रोश जनः सर्व्वो धिक् त्वां दशरथन्त्विति ॥”)

नाथहरिः, पुं, ( नाथं हरति स्थानात् स्थानान्तरं नयतीति। नाथ+हृ+“हरतेर्द्द तिनाथयोः पशौ।” ३। २। २५। इति इन्।) पशुः। इति मुग्धबोधव्याकरणम् ॥

नादः, पुं, ( नद शब्दे+भावे घञ्।) शब्दः। इत्यमरः। १। ७। २३॥ ( यथा, हरिवंशे। २३५। ५६।
“विभान्ति ते देववराः ससाध्याः
प्रभातशक्लस्वनसिंहनादाः ॥” )
अर्द्धचन्द्राकृतिवर्णः। स चानुस्वारवदुच्चार्य्यः। यथा अर्द्धचन्द्रोऽनुस्वारः। इति भुवनेश्वरीमन्त्रे कृष्णानन्दः॥ तत्पर्य्यायः। अर्द्धेन्दुः २ अर्द्धमात्रा ३ कलाराशी ४ सदाशिवः ५ अनुच्चार्य्या ६ तुरीया ७ विश्वमातृकला ८ परा ९। इति बीजवर्णाभिधानम् ॥ ब्रह्मस्वरूपघोषविशेषः। यथा,—
“सच्चिदानन्दविभवात् सकलात् परमेश्वरात् ।
आसीच्छक्तिस्ततो नादस्तस्माद्बिन्दुसमुद्भवः ॥
नादो बिन्दुश्च बीजञ्च स एव त्रिविधो मतः ।
भिद्यमानात् पराद्बिन्दोरुभयात्मा रवोऽभवत् ॥
स रवः श्रुतिसम्पन्नः शब्दो ब्रह्माभवत् परम् ॥
सकलादिति मूर्त्तात्। नादो घोषः। बिन्दुः प्रणवः स च बीजञ्च सर्व्ववर्णप्रभवत्वात्। तथा च।
समाहितात्मनो ब्रह्मन् ! ब्रह्मणः परमेष्ठिनः ।
हृद्याकाशादभून्नादो वृत्तिरोधाद्विभाव्यते ॥
ततोऽभूत्त्रिविदोङ्कारो योऽव्यक्तः प्रभवः स्वराट्।
इत्यारभ्य ततोऽक्षरसमाम्नायमसृजद्भगवानजः॥
इति श्रीभागवतम् ॥”
इत्यलङ्कारकौस्तुभस्य द्वितीयस्तवकः ॥ * ॥
“नाभेरूर्द्ध्वं हृदि स्थानान्मारुतः प्राणसंज्ञकः ।
नदति ब्रह्मरन्ध्रान्ते तेन नादः प्रकीर्त्तितः ॥
अपि च ।
आकाशाग्निमरुज्जातो नाभेरूर्द्ध्वं समुच्चरन् ।
मुखेऽभिव्यक्तिमायाति यः स नाद इतीरितः ॥
स च प्राणिभवोऽप्राणिभवश्चोभयसम्भवः ॥
आद्यः कायभवो वीणादिभवस्तु द्वितीयकः ।
तृतीयोऽपि च वंशादिभव इत्थं त्रिधा मतः ॥
यदुक्तं ब्रह्मणः स्थानं ब्रह्मग्रन्थिश्च यो मतः ।
तन्मध्ये संस्थितः प्राणः प्राणाद्वह्निसमुद्भवः ।
वह्निमारुतसंयोगान्नादः समुपजायते ॥
न नादेन विना गीतं न नादेन विना स्वरः ।
न नादेन विना रागस्तस्मान्नादात्मकं जगत् ॥
न नादेन विना ज्ञानं न नादेन विना शिवः ।
नादरूपं परं ज्योतिर्नादरूपी परं हरिः ॥”
इति सङ्गीतदामोदरः ॥
( यथा च सङ्गीतदर्पणे ।
“गीतं नादात्मकं वाद्यं नादव्यक्त्या प्रशस्यते ।
तद्द्वयानुगतं नृत्यं नादाधीनमतस्त्रयम् ॥
नादेन व्यज्यते वर्णः पदं वर्णात् पदाद्वचः ।
वचसो व्यवहारोऽयं नादाधीनमतो जगत् ॥
आहतोऽनाहतश्चेति द्विधा नादो निगद्यते ॥
सोऽयं प्रकाशते पिण्डे तस्मात् पिण्डोऽभिधीयते ॥
तत्रानाहतनादन्तु मुनयः समुपासते ।
गुरूपदिष्टमार्गेण मुक्तिदं न तु रञ्जकम् ॥
स नादस्त्वाहतो लोके रञ्जको भवभञ्जकः ।
श्रुत्यादिद्वारतस्तस्मात्तदुत्पत्तिर्निरूप्यते ॥”
किञ्च,—
“धर्म्मार्थकाममोक्षाणामिदमेवैकसाधनम् ॥
नादविद्यां परां लब्ध्वा सरस्वत्याः प्रसादतः ।
कम्बलाश्वतरौ नागौ शम्भोः कुण्डलतां गतौ ॥
पशुः शिशुर्मृगो वापि नादेन परितुष्यति ।
अतो नादस्य माहात्म्यं व्याख्यातुं केन शक्यते ॥”
आञ्जनेयः ।
“नादाब्धेस्तु परं पारं न जानाति सरस्वती ।
अद्यापि मज्जनभयात्तुम्बं वहति वक्षसि ॥”
अथ नादोत्पत्तिप्रकारः ।
“आत्मना प्रेरितं चित्तं वह्निमाहन्ति देहजम् ।
ब्रह्मग्रन्थिस्थितं प्राणं स प्रेरयति पावकः ॥